# ॥ तैत्तिरीयोपनिषत्॥

## ॥ शीक्षावल्ली॥

॥ हरिः ओम्॥

शन्नो मित्रः शंवरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः।

नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि।

ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्।

अवतु वक्तारम्। ॐ शान्तिश्शान्तिश्शान्तिः॥ १॥

शीक्षां व्याँख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः॥ २॥

सह नौ यशः। सह नौ ब्रह्मवर्चसम्। अथातस्सꣳहिताया उपनिषदं व्याँख्यास्यामः।

पञ्चस्वधिकरणेषु। अधिलोकमधिज्यौतिषमधिविद्यमधि प्रजमध्यात्मम्। तामहासꣳहिता

इत्या चक्षते। अथाधिलोकम्। पृथिवी पूँर्वरूपम्। द्यौरुत्तररूपम्। आकाशस्सन्धिः॥ ३॥

वायुस्सन्धानम्। इत्यधिलोकम्। अथाधिज्यौतिषम्। अग्निः पूँर्वरूपम्। आदित्य उत्तररूपम्।

आपस्सन्धिः। वैद्युतस्सन्धानम्। इत्यधिज्यौतिषम्। अथाधिविद्यम्। आचार्यः पूँर्वरूपम्॥ ४॥

अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनꣳ सन्धानम्। इत्यधिविद्यम्। अथाधिप्रजम्।

माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननꣳ सन्धानम्। इत्यधिप्रजम्॥ ५॥

अथाध्यात्मम्। अधराहनुः पूर्वरूपम्। उत्तराहनुत्तररूपम्। वाक्सन्धिः। जिह्वा सन्धानम्।
इत्यध्यात्मम्। इतीमा महासꣳहिताः। य एवमेता महासꣳहिता व्याख्याता वेद। सन्धीयते
प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन॥ ६॥

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य
देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः
कोशोऽसिमेधया पिहितः। श्रुतं मे गोपाय। आवहन्ती वितन्वाना॥ ७॥

कुर्वाणा चीरमात्मनः। वासाꣳसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह।
लोमशां पशुभिस्सह स्वाहा। आमायन्तु ब्रह्मचारिणस्स्वाहा॥ ८॥

यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा। तन्त्वा भग प्रविशानि स्वाहा। स मा भग
प्रविश स्वाहा। तस्मिन्सहस्रशाखे। निभगाऽहं त्वयि मृजे स्वाहा। यथाऽऽपः प्रवताऽऽयन्ति।
यथा मासा अहर्जरम्। एवम् मां ब्रह्मचारिणः। धातरायन्तु सर्वतस्स्वाहा। प्रतिवेशोऽसि
प्रमाभाहि प्रमापद्यस्व॥ ९॥

भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामुहस्मै तां चतुर्थीम्। माहाचमस्यः प्रवेदयते।
मह इति। तद्ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः। भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्।

सुवरित्यसौ लोकः॥ १०॥

मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति वायुः।
सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतिꣳषि महीयन्ते। भूरिति
वा ऋचः। भुव इति सामानि। सुवरिति यजूꣳषि॥ ११॥

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति
व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्चतुर्धा।
चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति॥ १२॥

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण
तालुके। य एषस्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य
शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ॥ १३॥

सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्।
वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः। एतत्ततो भवति। आकाशशरीरं ब्रह्म।
सत्यात्म प्राणारामं मन आनन्दम्। शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्स्व॥ १४॥

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि। आप ओषधयो
वनस्पतय आकाश आत्मा। इत्यधिभूतम्। अथाध्यात्मम्। प्राणो व्यानोऽपान उदानस्समानः।

चक्षु॒श्श्रोत्रं॒ मनो॒ वाक्। त्वक् चर्म॑मा॒ꣳसꣳस्नावाऽस्थि॑ म॒ज्जा। ए॒तद॑धिवि॒धाय॒ ऋषि॒रवो॑चत्।
पाङ्क्तं॒ वा इ॒दꣳ सर्व॑म्। पाङ्क्ते॑नै॒व पाङ्क्तꣳ॑स्पृणो॒तीति॑॥ १५॥

ओमिति॒ ब्रह्म॑। ओमिती॒दꣳसर्व॑म्। ओमित्ये॒तद॑नुकृति ह स्म॒ वा अ॒प्योश्रा॑व॒येत्याश्रा॑वयन्ति।
ओमिति॒ सामा॑नि गायन्ति। ओꣳशोमिति॒ श॒स्त्राणि॑ शꣳसन्ति। ओमित्य॒ध्व॒र्युः प्र॑तिग॒रं
प्रति॑गृणाति। ओमिति॒ ब्रह्मा॒ प्रसौ॑ति। ओमित्य॑ग्निहो॒त्रमनु॑जानाति। ओमिति॒
ब्राह्म॒णः प्र॑वक्ष्यन्ना॑ह॒ ब्रह्मोपा॑प्नवा॒नीति॑। ब्रह्मै॒वोपा॑प्नोति॥ १६॥

ऋतं च स्वाध्यायप्रव॑चने॒ च। सत्यं च स्वाध्यायप्रव॑चने॒ च। तपश्च स्वाध्यायप्रव॑चने॒ च।
दमश्च स्वाध्यायप्रव॑चने॒ च। शमश्च स्वाध्यायप्रव॑चने॒ च। अग्नयश्च स्वाध्यायप्रव॑चने॒ च।
अग्निहोत्रं च स्वाध्यायप्रव॑चने॒ च। अतिथयश्च स्वाध्यायप्रव॑चने॒ च। मानुषं च
स्वाध्यायप्रव॑चने॒ च। प्रजा च स्वाध्यायप्रव॑चने॒ च। प्रजनश्च स्वाध्यायप्रव॑चने॒ च।
प्रजातिश्च स्वाध्यायप्रव॑चने॒ च। सत्यमिति सत्यवचा॑ रा॒थीत॒रः। तप इति तपो॑नित्यः
पौरुशि॒ष्टिः। स्वाध्यायप्रवचने एवेति नाको॑ मौद्ग॒ल्यः। तद्धि॒ तप॑स्तद्धि॒ तपः॥ १७॥

अ॒हं वृ॒क्षस्य॒ रेरि॑वा। की॒र्तिपृ॒ष्ठं गि॒रेरि॑व। ऊ॒र्ध्वप॑वित्रो वा॒जिनी॑व स्व॒मृत॑मस्मि।
द्रवि॑ण॒ꣳ॒सव॑र्चसम्। सुमेधा अ॑मृतो॒क्षितः। इति त्रिशङ्को॑र्वेदा॑नु॒वचनम्॥ १८॥

वेदमनूच्याचार्योऽन्तेवासिनम॑नुशा॒स्ति। स॒त्यं वद। ध॒र्मं चर। स्वाध्याया॑न्मा प्र॒मदः।

आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्।
धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां
न प्रमदितव्यम्॥ १९॥

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव।
अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि।
यान्यस्माकꣳसुचरितानि। तानि त्वयोपास्यानि॥ २०॥

नो इतराणि। ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयाऽऽसने न प्रश्वसितव्यम्।
श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।
अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्॥ २१॥

ये तत्र ब्राह्मणास्सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामास्स्युः। यथा ते तत्र वर्तेरन्।
तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणास्सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा
धर्मकामास्स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा
वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमुचैतदुपास्यम्॥ २२॥

शन्नो मित्रश्शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः।
नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्।

ऋ॒तम॑वादिषम्। स॒त्यम॑वादिषम्। तन्माम॑वीत्। तद्व॒क्तार॑मावीत्। आवी॒न्माम्।

आवी॑द्व॒क्तार॑म्। ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥ २३॥

॥ हरि॑ः ओ(३)म्॥

**॥ इति शीक्षावल्ली॥**